।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीजिनदत्तसूरिप्राचीनपुस्तकोद्धारफण्ड ( सुरत ) ग्रन्थांक-४७

॥ श्रीजिनाय नमः ॥

श्रीखरतरगच्छावतस सूरिपुरन्दर जिनपतिसूरिशिष्य-पण्डितप्रवर-पूर्णभद्रगणिविरचितम्-प्राचीनं ताडपत्रीयं

# अतिमुक्तकमुनिचरित्रम् ।

( पद्यं )

जङ्गमयुगप्रधान-भट्टारक-श्रीमज्जिनकृपाचंद्रसूरीश्वराणां शिष्यरत्न—

उपाध्यायपदालङ्कृत सुखसागरमुनिवरोपदेशेन—

श्रीरायपुरवास्तव्येन श्रेष्ठिवर्य्य सूरजमल भंवरलाल पुगलिया-विहितेन द्रव्यसाहाय्येन प्रकाशितम् ।

प्रकाशकः—

श्रीजिनदत्तसूरिज्ञानभंडार कार्यवाहक मु. सुरत.

सं० २००१ भेट प्र०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुद्रकः—शाह गुलाबचंद लल्लुभाइ
महोदय प्रेस. दाणापीठ
मु० भावनगर.

卐

पुस्तकप्राप्तिस्थानम्—
**श्रीजिनदत्तसूरिज्ञानभंडार.**
ठि० गोपीपुरा, सीतलवाडी उपासरा.
मु० सुरत. ( गुजरात )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# निवेदन—

भारतीय साहित्यमें जैन साहित्यको जो उच्चस्थान प्राप्त है, इससे विद्वज्जन सुपरिचित है, जैन साहित्य चार विभागोंमें विभाजित है, जिनमें चरितानुवाद भी है।

पुरातन साहित्यपर दृष्टिपात करनेसे स्पष्ट विदित होता है कि पुरातन भव्य आदर्श पुरुषो—मुनियों के जीवनचरित्रों की कमी नहीं है, हो भी कैसे सकति, महापुरुषोंका जीवन मानवोंको अति शीघ्र धार्मिकादि प्रवृतिमें प्रवृत्त करने को प्रोत्साहित करते है, समस्त संसारका इतिहास आदर्श महापुरुषोंका इतिहास है। ऐसे विषय पर जैनाचार्यों—मुनियोंने लेखिनी चलाकर मानव—समाजका महान् उपकार किया है,ऐसे भव्य पुरुषोंके जीवन सदृश प्रस्तुत "अतिमुक्तकं चरित्र" है जो आपके करकमलोंमे समर्पित है। प्रकृत चरित्र में बाल-मुनि अतिमुक्त मुनिका आदर्शचरित्र वर्णन अत्यन्त सुंदरतापूर्ण लिखा गया है। उक्त बाल मुनि मात्र ६ वर्षकी अल्प वयमें परम तारक चरमतीर्थंकर श्रमणभगवान् श्रीमहावीर देवके करकमलसे दीक्षित होकर एकादशांग अध्ययन करके, महान् उग्रतपश्चर्या करके केवलज्ञान प्राप्तकर मोक्षगति को प्राप्त हुए। प्रस्तुत ग्रन्थ मात्र धार्मिक दृष्टिसे ही महत्त्वका नहीं है अपितु भाषाशास्त्र एवं अलंकारादि दृष्टियों से अत्यन्त महत्त्वपूर्ण व उच्च कोटिका है। दिखने अवश्य लघु है पर गुणोंकीं अपेक्षा उतना ही गरीष्ठ व आकर्षक है, रचनाशैलि अत्यंत चित्ताकर्षक है. एकएक श्लोकपर कवित्वका चमत्कार पाया जाता है। प्रस्तुत ग्रन्थनिर्माता खरतरगच्छेश्वर श्रीजिनपति-सूरिजीके शिष्य थे जो उस समय के विद्वानों में सर्वोत्कृष्ट गिनेजाते जो, और वे वि. सं. १२१०—७७ तक विद्यमान थे। वे जैसे

For Private And Personal Use Only

विद्वान् थे वैसे ही प्रचंड प्रभावक भी थे। उन्होंने आशापल्लि ( गुजरात ) में आचार्यश्री प्रद्युम्नसूरिजीके साथ शास्त्रार्थ किया था जिसमें विजयलक्ष्मीं आपही को प्राप्त हुई, ( चै० कु० वृ० ) हिन्दसम्राटकुलतिलक श्रीमहाराजा पृथ्वीराज चौहांणकी राजसभामें उ० पद्मप्रभको शास्त्रार्थमें पराजित किया था, ( ख० गु० ) उस समय भारतमें पृथ्वीराज की सभा विद्वानों के लिये प्रसिद्ध थी, आचार्यमहाराजने वि. सं. १२३३ वर्षे कल्याणनगरमें महावीरस्वामी की प्रतिष्ठा की (तीर्थकल्प) एवं "षट्स्थानकवृत्तिका" संशोधन किया । साथहि साथ "प्रबोधोदय वाद स्थल," "संघपट्टकबृहद्वृत्ति," "पंचलिंगी" विवरणादि ग्रन्थ निर्माणकर धार्मिक साहित्यमें अभिवृद्धि की। आपका सारा समुदाय विद्वानों से ओतप्रोत था, प्रस्तुत ग्रन्थ रचयिता पूर्णभद्रगणि भी उच्चश्रेणीके विद्वान् थे। पर आपका विस्तृतजीवन अनुपलब्ध है, मात्र इतना ही लिखा जा सकता है कि आपने प्रस्तुत अतिमुक्तकचरित्र वि. सं. १२८२ प्रल्हादनपुर में और धन्यशालिभद्रचरित्र वि. सं. १२८५ जैसलमेर में निर्माण किये। अति विस्तृत परंपरा प्रशस्तिमें दीहुई है पाठक देखले, प्रस्तुत ग्रन्थ समग्र भारतवर्षमें मात्र जैसलमेरके ज्ञानभंडार में सुरक्षित है, जो ताडपत्रोपरि आलेखित है, वहींपर से प्रेसकॉपी करवाकर मंगाया गया है, अतः एक ही प्रति पर से इसका प्रकाशन हो रहा है, इसका संशोधन पूज्य गुरुवर्य श्रीमान् उपाध्यायजी महाराज मुनि सुखसागरजी म० एवं जेठालालभाई शास्त्रीजीने कुशलतापूर्वक किया है, तथापि दृष्टिदोषसे स्खलनारह गई हो तो पाठक सुधारके पढें। प्रस्तुत ग्रन्थरत्नको प्रकाशन करानेमें रायपुरनिवासी शेठ सूरजमल भंवरलाल पुगलियाने आर्थिक सहायता की है अतः वे श्रुतभक्ति करने कारण धन्यवाद के पात्र है।

नवापारा : सं. २००१ : अक्षय तृतीया.

मुनि मंगलसागर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

श्रीखरतरगच्छावतंस-सूरिपुरन्दर-जिनपतिसूरिशिष्य-पण्डितप्रवर-पूर्णभद्रगणिविरचितम्

# अतिमुक्तकमुनिचरित्रम् ॥

श्रीमद्विश्वत्रयीनाथं, नाथं कल्याणसंपदाम् । वर्द्धमानगुणश्रेणिं, वर्द्धमानमुपास्महे ॥ १ ॥

नत्वा जिनपतीन् देवान्, गुरूनप्याहितीं गिरम् । अतिमुक्तकबालर्षे-श्चरितं परिकीर्त्त्यते ॥ २ ॥

अस्तीह भरतस्यार्द्धे, जम्बूद्वीपस्य दक्षिणे । रम्योद्यानवनोद्देशं, रम्यवापीसरोवरम् ॥ ३ ॥

रम्यहर्म्यगृहारामं, रम्यदेवकुलाकुलम् । नानापण्यसमाकीर्णा-ऽऽपणश्रेणिमनोरमम् ॥ ४ ॥

कान्तसुश्लिष्टशृङ्गाट-चतुष्कत्रिकचत्वरम् । सुरलोकसमश्रीकं, पुरं पोलासनामकम् ॥ ५ ॥ ( त्रिभिर्विशेषकम् )

तेजस्वी भानुमालीव, सकलश्चन्द्रमा इव । धीमानमरमन्त्रीव, कविः कविरिवाभितः ॥ ६ ॥

राजराज इव श्रीमान्, कन्दर्प्प इव रूपवान् । त्रायस्त्रिंशसुपर्वेव, सर्वदा सुखसङ्गतः ॥ ७ ॥

सद्धर्म्मनिरतः प्रायः, सन्तुष्टात्मा निरामयः । शीलशाली निरातङ्को, विशालसरलाशयः ॥ ८ ॥

रतः परोपकारेषु, सत्यवादी प्रियंवदः । नरवर्गो भवत्व(त्य)त्रा-ऽनुपसर्गो निसर्गतः ॥ ९ ॥ चतुर्भिः कुलकम् ॥

For Private And Personal Use Only

विकसद्भव्यपद्मास्या, नीलोत्पलदलेक्षणाः । लावण्योल्वणकल्लोल-मालाभिः सुमनोहराः ॥ १० ॥
अनेकविभ्रमाकीर्ण्णा, मनोरमपयोधराः । सरस्य इव सम्पूर्णाः, कामिन्यस्तत्र रेजिरे ॥ ११ ॥ युग्मम् ॥
स्वर्ण्णरूप्यमयैस्तत्र, विभ्रेजे कपिशीर्षकैः । वप्रोऽर्कश्वेतरुग्बिम्बै-र्यथाद्रिर्मानुषोत्तरः ॥ १२ ॥
तस्मिंश्च पुण्डरीकाख्यः, सत्यभामापरिस्कृतः । साम्राज्यं पालयामास, भूपतिर्विजयाभिधः ॥ १३ ॥
बभूवोर्वीपतेस्तस्य, वल्लभाऽत्यन्तवल्लभा । आख्यता(आख्यातः) श्रीरिति ख्याता, प्रेयसी श्रीर्हरेरिव ॥ १४ ॥
सर्वलक्षणसम्पूर्ण्णं, सुखं सुतमसूत सा । मकरध्वजसङ्काशं, रूपलावण्यसम्पदा ॥ १५ ॥
अतिमुक्तकनामानं, तरुं पुष्पमनोहरम् । सुप्ते(स्वप्ने)ऽस्मिन् दृष्टवत्यम्बा, गर्भस्थे पुण्यशालिनि ॥ १६ ॥
ततस्तदनुसारेण, बान्धवार्चनपूर्वकम् । अतिमुक्तक इत्याख्यां, स्वसूनोर्विदधे पिता ॥ १७ ॥ युग्मम् ॥
षड्वर्षः पञ्चधात्रीभि-र्लाल्यमानोऽतिमुक्तकः । कौमुदीन्दुरिवानन्द-दायी पित्रोरजायत ॥ १८ ॥
अन्यदा श्रीमहावीरो, भव्याम्भोजदिवाकरः । स्वपादैः पावयन्नुर्वीं, बहिरुद्यानमाययौ ॥ १९ ॥ कथम् ? ॥
छत्रेण वृत्तेन नभःस्थितेन, विराजमानो(नः) शरदभ्रधाम्ना । विलंबिमुक्ताफलमालिकेन, सुधांशुनेवायतभानुकेन ॥२०॥
व्योमस्थितेनेन्दुकरप्रभेण, प्रवीज्यमानश्चमरद्वयेन । गङ्गापगासिन्धुमहाश्रवन्ती-स्रोतोयुगेनेव निषेव्यमाणः ॥ २१ ॥
जात्याष्टापदपादपीठपट्टुना सिंहासनेनोच्चकै-र्ज्योतिष्कालयविभ्रमेण जगतामाश्चर्यमुल्लासयन् ।
नानावर्ण्णमणिप्रभासमुदयैर्दृब्धेन्द्रबाणासन-व्रातेन स्फटिकोपलेपरचितेनाकाशसंचारिणा ॥ २२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरमणिमयदण्डप्रान्तवातावधूताऽ-तिशयविशदवर्ण्णस्फारचेलाञ्चलेन ।
पुर उपचितधाम्ना व्योमनीन्द्रध्वजेन, प्रकटितवपुषेव श्रेयसा राजमानः ॥ २३ ॥
सद्धर्मचक्रेण पुरःस्थितेन, जिनः सुधाम्ना समुपोष्यमाणः । हतस्य मोहप्रतिको(के)शवस्य, चक्रेण नूनं स्ववशीकृतेन॥२४॥
स्वर्णाम्बुजैः पादतलानुयायिभि-र्निषेव्यमाणो नवनीतकोमलैः ।
प्रदक्षिणावर्त्तविधायिभिः क्षणा-द्विनिर्जितैश्चारुमुखश्रिया ध्रुवम् ॥ २५ ॥ सप्तभिरादिकुलकम् ॥
मणिकनकरजतनिर्मित-शालत्रयभूषितं समवसरणम् । तत्र च देवच्छन्दक-रमणीयं विदधिरे विबुधाः ॥ २६ ॥
तस्याशोकद्रुमं मध्ये, द्वात्रिंशाद्वरर(द्वात्रिंशद्धनुरु)च्छ्रयम् । चक्रुर्भव्यानिवाह्वातुं, चलत्पल्लवपाणिभिः ॥ २७ ॥
पूर्वद्वाराऽविशत्तत्र, स्वामी व(स्व)र्ण्णसमप्रभः । प्रोत्तुङ्गतनुसंस्थानः, सुमेरुरिव जङ्गमः ॥ २८ ॥
दत्त्वा प्रदक्षिणां नत्वा, तीर्थं चोपाविशत्प्रभुः । पर्षदोऽपि गणाधीश-प्रमुखाः समुपाविशन् ॥ २९ ॥
तद्दृष्ट्वाद्भुतमागत्य, प्लवमानः कुरङ्गवत् । उद्यानपालो भूपाल-मभिनन्द्य व्यजिज्ञपत् ॥ ३० ॥
देव ! त्वन्नगरोद्याने, श्रीवीरः श्रीवणाभिधे । हस्तिमल्ल इवाभ्यागात्, सुसाधुकलभावृतः ॥ ३१ ॥
विविधतरुषु स्फूर्ज-त्पुष्पप्रवालफलोद्गमैः, सकलजनताचेत-श्चक्षुःप्रमोदविधायिनः ।
युगपदृतवः सर्वे, यस्यागमे विजजृम्भिरे । पुर उपवने दूर-स्थावाक्षणे(स्था वीक्षणे) सुहृदः क्षणा(त्)(?)॥३२॥तथाहि—
किशलयकरैर्नृत्यंतीव प्रवालमणिप्रभैः, मृदुलपवनोद्धूतैरुच्चैरशोकमहीरुहः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रमरविरुतैर्गायन्तीव श्रुतिप्रमदप्रदै-स्त्रिभुवनगुरोः स्वस्योद्याने समागमहर्षुला: ॥ ३३ ॥
समदनवधूगाढाऽऽश्लेषं विनाऽपि समन्ततः, कुरवकलभः पुष्पैः पूर्णो बभूव विकासिभिः ।
स्मरहुतवहोत्तापक्लांतिप्रशान्तिपयोभृतो, न भवति जिनस्यान्ते चेष्टा मनोभवसम्भवा ॥ ३४ ॥
मधुररसितं कुर्वन्त्याम्रद्रुमोपरि संस्थिताः, सरसरुचिराङ्कूरास्वादप्रवर्द्धितसम्मदाः ।
पिकयुवतयो गायन्तीव त्रिलोकगुरोर्गुणान्, मदनसुभटन्यक्कारादीन् जगत्त्रयविश्रुतान् ॥ ३५ ॥
इति वसन्तऋतू रुरुचेतरां, कुसुमयन्नतिमुक्तमहीरुहम् ।
कमपि लाभमिवाद्भुतसम्पदां, पिशुनयन्नतिमुक्तकुमारके ॥ ३६ ॥ १
शरदिजरजनीशश्वेतकान्तिप्रसून-स्फुरदनुपमगन्धैर्जातिरुद्यानमध्यम् ।
सुरभयति सतीवातीव कीर्तिप्रतानै-स्त्रिजगदिदमशेषं निर्मलैः शीलजन्यैः ॥ ३७ ॥
उपवनसरसीनां तीरगाः स्वादुनीरं, निजकुसुमपरागैः पाटला वासयन्ति ।
जिनवरचरणानां वन्दनायागतानां, ध्रुवमिह भविनामातिथ्यमाधातुमुच्चैः ॥ ३८ ॥
त्रिभुवनगुरुवीरस्वामिभामण्डलस्य, स्वकतनुसदृशस्य प्राप्य मैत्रीमिवोच्चैः ।
तरणिरपि बभूवातीव तेजोऽभिरामो, भवति ननु सुवृत्तैः संस्तवाद्धामवृद्धिः ॥ ३९ ॥
मम तिथौ प्रभुरेव समागम-द्दिवमपि प्रविहाय भुवस्तलम् ।

For Private And Personal Use Only

इति निदाघऋतौ( तू ) रमणीयतां, समगमद्बहुपुष्पविकासनैः ॥ ४० ॥ २
नृत्यं सदा विदधतः सुमनोमनोज्ञं, केकायितं विदधिरे सुतरां मयूराः ।
धर्मोपदेशनरवं जिननायकस्य, श्रुत्वेव वारिधरगर्जितशङ्किचित्ताः ॥ ४१ ॥
विश्वन्धराऽभवदपूर्व्वपुरुप्रशस्य–सस्यप्रसूनफलसञ्चयरोचमाना ।
नीलत्तमालदलितालविशालशाल–वंशीप्रवालकलिता हरितालिकान्ता ॥ ४२ ॥
गन्धोद्धुरं विकसितप्रचुरप्रसूनम्, सत्केतकीवनमलं विमलं चुचुम्बुः ।
सौरभ्यलुभ्यदलयो मधुरं रणन्त–स्त्यक्त्वाऽन्यपुष्पनिकरं मकरन्दमुक्तम् ॥ ४३ ॥
अस्मत्प्रसन्ने भुवने यथा भवे–दुर्भिक्षशान्तिर्न तथेतरर्तुषु ।
इतीव वर्षा अभवन्मनोरमा, धाराकदम्बप्रमुखैर्महीरुहैः ॥ ४४ ॥ ३ ॥
निष्पन्नशाल्यादिकणादनेन खे, पुष्टाङ्गकाः कीरपरम्परा बभुः ।
बद्धा जिनेन्द्रागमने प्रहृष्टया, शरच्छ्रिया वन्दनमालिका इव ॥ ४५ ॥
स्फूर्जत्करस्तारतरोडुभिर्वृतः, कर्पूरपारीविशदः सुधाकरः ।
बभार शोभां भ्रमतः करेणुभि,–र्वृतस्य खे निर्जरराजदन्तिनः ॥ ४६ ॥
अलब्धमध्यानि परैस्तु सर्वथाऽ–न्तरीक्षवन्निःकलुषाणि सन्ततम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विकासिपद्मौघयुतानि सर्वदा, सतां मनांसीव सरांसि रेजिरे ॥ ४७ ॥
मम जलै रसितैरमृतोपमै-र्भवति नीरुगिदं भुवनं सदा ।
इति शरत्समयो नवकेतकी-विकसनैः प्रमदादिव सिष्मिये ॥ ४८ ॥ ४ ॥
ईक्षवोऽतिसरलांसुकुलीनाः, प्रोन्नताः प्रवरपर्वकदम्बाः । उत्तमा नरगणा इव रेजु-श्चारवो रसयुजः सुकुमाराः ॥ ४९ ॥
भाति पक्वबदरीवनमुच्चै-र्विद्रुमारुणफलावलिकान्तम् । पद्मरागमणिसंहतियुक्तं, कल्पवृक्षवनवत्सुमनोज्ञम् ॥ ५० ॥
नीरनूतनयवाङ्कुरपूराः, स्निग्धसान्द्रमधुराः स्म विभान्ति ।
माङ्गलिक्यमिव तीर्थकरेऽस्मि-न्नागते विरचिता हिमलक्ष्म्या ॥ ५१ ॥
अनुभवन्त्यपि भोजनजीर्णतां, शयनशर्म च दीर्घनिशासु मे ।
तनुभृतो बलशालिन उच्चकै-रिति हिमर्तुरराजदनारतम् ॥ ५२ ॥ ५ ॥
श्यामा लता सितीभूता-प्युद्यानवनमालिका । विकचकुन्दपुष्पौघै-र्हसन्तीवोपलक्ष्यते ॥ ५३ ॥
वनं मरुबकेणैतत्कृष्टेनापि सुगन्धिना । शश्वन्मृगमदेनेव, सुरभीक्रियतेतराम् ॥ ५४ ॥
रोहुलवती वीरुत्पुष्पाणि भ्रमरालयः । सुरभित्वविकासाभ्यां, बन्धुराणि सिषेविरे ॥ ५५ ॥
गतपरिमला दुर्गन्धाढ्या भवन्ति विमर्दने, हृत्सुखकृतः शेषर्तूनां प्रसूनदलालयः ।
भ्रमदमनकेनैताभ्योऽन्यादृशेन विजग्यिरे, सुजननिचयेनेवेत्युच्चैर्मुदं शिशिरो दधौ ॥ ५६ ॥ ६ ॥

For Private And Personal Use Only

इति जिनागमने ऋतवोऽभव–न्नरपते ! निखिलाः सुमनोरमाः ।
तनुभृतोऽप्यखिला मुदमादधु,–र्जलधराभ्युदये शिखिनो यथा ॥ ५७ ॥
सिंहासनं रत्नमयं च पादुका,–द्वयं विहायाञ्जलिशालिमस्तकः ।
विधाय चित्ते नृपतिर्जिनेश्वरं, प्रमोदफुल्लो न(न्न)यनो ननाम तम् ॥ ५८ ॥
प्रहृष्टचेताः परितुष्टिदान,–मुद्यानपालाय ददौ जि(ज)नेन्द्रः ।
हिरण्यमिच्छाच्छिदुरं महेच्छो, दारिद्र्यहंता हि नृपप्रसादः ॥ ५९ ॥
श्रीजिनाधिपतिवन्दनोचिते, पर्यवस्त सदशे अखण्डिते । भूपतिर्विशदनव्यवाससी, कौमुदीन्दुकरनिर्मिते इव ॥ ६० ॥
जात्यरुक्ममयमौलिराहितो, मस्तके नृपति शास्म (नरपतेः स्म) शोभते ।
प्राज्यवर्यमणिरश्मिसञ्चय,–द्योतिताम्बरपथोंऽशुमानिव ॥ ६१ ॥
आमुचच्छ्रवणयोर्नराधिपः, शातकुम्भमयकुण्डलद्वयम् ।
मौक्तिकांशुनिचितं वचःसुधा,–कुण्डयुग्ममिव पार्श्वतः स्थितम् ॥ ६२ ॥
कान्तकण्ठतललम्बितायता, तारहारलतिकाऽवनीपतेः ।
तद्वपुर्लवणिमाऽऽपगापयः–फेनराजिरिव शोभतेतराम् ॥ ६३ ॥
एवमादिबहुरत्नभूषणै,–र्भूषितो विजयभूपतिर्बभौ । अर्थिकल्पितफलप्रदोदयः, कल्पवृक्ष इव जङ्गमः क्षितौ ॥ ६४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राज्यराष्ट्रबलवृद्धिकारणं, तारणं रणमहापयोनिधेः। आरुरोह वसुधाधवो वरं, वारणं समदवैरिवारणः ॥ ६५ ॥

आरुह्य सामन्तमहीभृतोऽप्य,-प्रसाधितेषु द्विरदेषु सर्वे।

प्रावृत्य तस्थुर्विजयावनीशं, सामानिका वा त्रिदशाधिनाथम् ॥ ६६ ॥

तुरङ्गमेष्वप्यारुह्य, राजपुत्राः सहस्रशः। भास्कराश्वोपमानेषु, क्षितीशमुपतस्थिरे ॥ ६७ ॥

सकिङ्किणीकध्वजभूषितेषु, जात्याश्वयुक्तेषु महारथेषु।

केचित्समारुह्य नरेन्द्रपुत्राः, पोलाशभूमि(मी)पतिपार्श्वमीयुः ॥ ६८ ॥

तीक्ष्णाग्रदीप्तायतकुन्तधारिणो, धनुर्भृतः पृष्ठनिबद्धतूणकाः।

पदातयः खेटकखड्गपाणयः, पुरः प्रचेलुर्विजयावनीशितुः ॥ ६९ ॥

मायूरातपवारणैः प्रतिनराधीशानुपर्युच्छ्रितैः, कुर्वन् व्योमसरः समुत्थितनवश्यामाम्बुजश्रेणिकम्।

माद्यत्कुञ्जरगर्जितोर्जितभरैर्हेषास्वनैर्वाजिनाम्, कुर्वाणो रथचीत्कृतैर्ध्वनिमयं सर्वं नभोमण्डलम् ॥ ७० ॥

विलम्बिमुक्तावलिनोत्तमाङ्गो,-पर्यातपत्रेण सुधांशुधाम्ना।

स्वात्यम्बुवाहेन सुधाकिरेव, कामप्यभिख्यामवगाहमानः ॥ ७१ ॥

घण्टाटणत्काररये(वे)ण दन्तिनां, दिशोऽभितस्तूर्यरवैश्च पूरयन्।

चचाल भक्त्या विजयो नरेश्वरः, श्रीमन्महावीरमनुत्सुको मुदा ॥ त्रिभिर्विशेषकम् ॥ ७२ ॥



For Private And Personal Use Only

विविधेषु समारुह्य, वाहनेष्वथ नागराः । अनुजग्मुर्महीनाथं, वन्दितुं जिननायकम् ॥ ७३ ॥
मतिविनिर्जितचित्रशिखण्डिजाः, प्रवरवेषभृतो नृपमन्त्रिणः ।
शिरसि दत्तशुभातपवारणाः, प्रययुरग्र्यसुखासनसंस्थिताः ॥ ७४ ॥
बलात्तुरङ्गमारूढा,-स्तरुणाः श्रावकाङ्गजाः । रेवन्तमनुकुर्वन्तः, प्रचेलुश्चलकुण्डलाः ॥ ७५ ॥
शीघ्रगेषु करभेष्वधिरुह्या,-लङ्कृतेषु बहुशो बहुमानात् ।
तीर्थनाथमभिवन्दितुमुच्चैः, केचनापि ययुरुच्छ्वसिताङ्गाः ॥ ७६ ॥
केचित्त्यक्तगृहारम्भाः, कृतस्नानाः सितांशुकाः । श्रावकाः पादचारेण, चेलुः पुष्पादिपाणयः ॥ ७७ ॥
आच्छादनोपेतसुखासनान्तः-स्थिता नृपान्तःपुरिकाश्च काश्चित् ।
उत्पत्तिपर्यङ्कगताऽमरीणां, लीलां वहन्त्यः प्रययुर्वनाय ॥ ७८ ॥
याप्ययानसमारूढा, धनिनां काश्चनाङ्गनाः । विद्याधर्य इव व्योम,-यानस्थावरमीयिरे ॥ ७९ ॥
पुरकुरङ्गदृशः पतिभिः समं, समभिरुह्य रथानरुणांशुकाः ।
कनकतोदनकेन तुरङ्गमा,-नुपवनं प्रति तैः समचालयन् ॥ ८० ॥
किमप्सरस ईदृशानुगमरूपसम्पद्भृतः, किमङ्ग ! पुरदेवताः प्रकटितस्वरूपा इमाः ।
अमूल(र्ले)वणिमार्णवः(वाः) किम(मु)सुराधिपत्यङ्गना,-स्तदेति हृदि काश्चन प्रकृतसंशयाः प्राणिनाम् ॥ ८१ ॥

तथा परिवृताङ्गका मू(म)लिनचारुचीनांशुकै,-र्विचित्रवरकञ्चुकाः परिहृतोरुदिव्यांशुकाः ।
ययुर्नगरनाय(यि)काश्वरमतीर्थपं वन्दितुं, वनं चरणचर्यया गतिविनिर्जितेभाङ्गनाः ॥ ८२ ॥ युग्मम् ॥
ददर्शाथ नृपश्छत्रा-तिच्छत्रं त्रिजगत्प्रभोः । चन्द्रबिम्बमिवानन्द,-दायि वृत्तं शुभोदयम् ॥ ८३ ॥
ततः स्तम्बेरमात्तस्मा,-दुत्ततार नराधिपः । शौर्यावर्जितसत्त्वौघः, पञ्चास्यः पर्वतादिव ॥ ८४ ॥
ततश्चरणचारेण, राजहंसश्चचाल सः । शुद्धपक्षद्वयः शोण,-क्रमणे हितमानसः ॥ ८५ ॥
समवसरणद्वारं प्राप्तो मुमोच नरेश्वरो, वरमसिमुपानत्के रम्य(म्यं)सितातपवारणम् ।
चमरयुगलीं कोटीरं चोत्तमाङ्गनिवेशितं, व्यसृजदखिलांस्ताम्बूलादीनपीह सचेतनान् ॥ ८६ ॥
एकशाट्युत्तरासङ्गं, विधाय वसुधाधवः । प्रविवेशोत्तरद्वारा, सुसमाहितमानसः ॥ ८७ ॥
अलश्चकाराञ्जलिसंपुटेन, स्वर्णोर्मिकासश्चयभास्वरेण । शिरःकिरीटेन यथा तदैव, यथैव वारं नृपतिर्ददर्श ॥ ८८ ॥
प्रदक्षिणानां त्रितयं विधाय, नृपो महावीरजिनेश्वरस्य ।
जानुद्वयं हस्तयुगं ललाटं, भूमौ समाश्रय्य नतिं चकार ॥ ८९ ॥
ततो बध्वाञ्जलिं राजा, प्रयतः पुरतः प्रभोः । स्तवनं कर्तुमारेभे, सद्भूतगुणकीर्त्तनम् ॥ ९० ॥
उन्नतः काञ्चनश्रीक,-स्त्वत्तो न्यूनः सुराचलः । प्रख्यातो(ऽ)मन्दरागोऽसौ, वीतरागस्त्वमुच्यसे ॥ ९१ ॥
हीनः कल्पतरुस्त्वत्त,-श्चिन्तितार्थप्रदोऽपि हि । यतस्ते तनुते नाथ !, चिन्ता चिन्तातिगं पदम् ॥ ९२ ॥

त्वत्समो न भवेदिन्दुः, सोमः पूर्णकलोऽपि च । सकलङ्को ह्यसौ ख्यातो, निष्कलङ्कस्त्वमीक्ष्यसे ॥ ९३ ॥
तमोऽपहोऽपि मार्त्तण्डो, नोपमां लभते तव । उत्तापकमहा ह्येष, त्वं प्रल्हादिमहाः पुनः ॥ ९४ ॥
समुद्रोऽलब्धमध्योऽपि, सादृश्यं भजते न ते । स जडप्रकृतिस्त्वं तु, विचक्षणशिरोमणिः ॥ ९५ ॥
नतिस्ते कुरुते नाथ !, सर्वेभ्योऽपि समुन्नतिम् । मानस्ते तनुते स्वामिन् !, विमानपतितां सताम् ॥ ९६ ॥
इत्यचिन्त्यप्रभावाय, तुभ्यं स्वामिन्नमो नमः । तथा कुरु यथा नाथ !, पूर्णभद्रो भवाम्यहम् ॥ ९७ ॥
पूर्वोत्तरस्यां दिशि शुद्धभूमौ, न्यविक्षत क्षोणिपतिस्ततोऽसौ ।
पातुं जिनाधीशवचःसुधौघं, श्रोतोऽञ्जलिभ्यां सुमनस्त्वबीजम् ॥ ९८ ॥
अन्येष्वपि यथास्थान,-मुपविष्टेषु सर्वतः । सुरासुरेषु सद्धर्म्म,-देशनां विदधे विभुः ॥ ९९ ॥ तथाहि ॥
भो भोः ! संसारकान्तारे, बम्भ्रमद्भिः सुखैषिभिः । सुखं न प्राप्यते जीवैः, क्लेश एवानुभूयते ॥ १०० ॥
यतः संसारकान्तारं, सर्वतोऽपि भयानकम् । क्रोधदावानलोद्दाम,-ज्वालाजालकरालितम् ॥ १०१ ॥
मदाष्टकमहादुर्ग,-गिरिकूटभयङ्करम् । मायाव्यालावलीकीर्ण्णं, लोभगर्त्तासमाकुलम् ॥ १०२ ॥
आपातमात्रमाधुर्य,-रम्यकामविषद्रुमम् । लसज्जन्मजरामृत्यु,-राक्षसौघसुदारुणम् ॥ १०३ ॥
कुतीर्थिकजनावास,-भिल्लपल्लीसमाकुलम् । रागादिभिल्लसंयुक्त,-मिह पल्लीशभीषणम् ॥ १०४ ॥
अस्मिन्नेवंविधेऽपि स्या,-त्संपर्कश्चेत्कदाचन । साक्षात्तीर्थाधिनाथेन, गुरुणा वा चरित्रिणा ॥ १०५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तन्मुखशीतांशो,-रास्वाद्य वचनामृतम् । भवन्ति सुखिनो भव्या,-श्चकोरा इव केचन ॥ १०६ ॥
सम्यक्त्वकलितं देश,-चारित्रं प्राप्य चापरे । द्वित्रैर्भवान्तरैर्भव्याः, लभन्ते शिवसम्पदम् ॥ १०७ ॥
तस्मिन्नेव भवे केचि,-ल्लब्ध्वा चारित्रमुत्तमम् । सम्प्राप्य केवलज्ञानं, यान्ति निर्वाणमव्ययम् ॥ १०८ ॥
यूयं तत्पूर्वचारित्र,-मात्मसात्कुरुत द्रुतम् । तदशक्ताः पुनर्देश,-चारित्रं श्रयतादरात् ॥ १०९ ॥
ततस्ते श्रीमहावीर,-मुखाम्भोजसमुद्भवम् । वचोमधुरसं पीत्वा, तुतुषुर्मधुपा इव ॥ ११० ॥
ये तत्राक्षेमविक्षेप,-दक्षमोक्षाभिकाङ्क्षिणः । दीक्षां जिघृक्षवः साक्षा,-दुपतस्थुर्जिनं च ते ॥ १११ ॥
बद्धाञ्जलिपुटाः प्रोचुः, संसारार्णववारितः । विधाय करुणामस्मा,-न्नाथ ! तारय तारय ॥ ११२ ॥
ततस्तीर्थंकरस्तेभ्यो, भव्येभ्यो भवहारिणीम् । प्रव्रज्यां भाविभद्रेभ्य,-स्तदैव विधिना ददौ ॥ ११३ ॥
ये पुनः सर्वचारित्र,-मादातुं नैव सेहिरे । तेषामारोपयामास, देशचारित्रमुज्ज्वलम् ॥ ११४ ॥
देशनान्तेऽथ वन्दित्वा, भगवन्तं जिनेश्वरम् । राजामात्यादयः सर्वे, जग्मुः स्थानं निजं निजम् ॥ ११५ ॥
अथ श्रीगौतमस्वामी, प्रथमो गणभृद्वरः । तपसा षष्ठषष्ठेन, सर्वदा कृतपारणः ॥ ११६ ॥
समचतुरस्रसंस्थान,-मुत्तमं धारयंश्चतुर्ज्ञानी । वज्रर्षभनाराचा,-भिधानसंहननबलशाली ॥ ११७ ॥
श्रीपृथ्वीवसुभूत्यङ्ग,-जन्मा सप्तकरोच्छ्रयः । चारुचामीकरच्छायः, स्वर्णाद्रिरिव जङ्गमः ॥ ११८ ॥
भगवन्तमनुज्ञाप्य, पोलाशं नगरं प्रति । स्वयं चचाल भिक्षार्थ,-मात्मलब्धिर्यतःप्रभुः ॥ ११९ ॥ चतुर्भिः कुलकम् ॥



For Private And Personal Use Only

अतिमुक्तकः कुमारोऽथ, तदा श्रीविजयाङ्गजः । षड्वर्षः कोमलालापो, वर्त्तमानः स्वमन्दिरे ॥ १२० ॥
लक्षपाकादिभिस्तैलैः, कृताभ्यङ्ग्या(ङ्ग)ङ्गसौख्यदैः । सुकुमारकरैश्छेकै,-र्मर्दितश्चाङ्गमर्दकैः ॥ १२१ ॥
चूर्णैः सुरभिभिः सूक्ष्मै,-र्विहितोद्वर्त्तनः सुधीः । स्नापितो वारयोषाभिः, कवोष्णैर्निर्मलैर्जलैः ॥ १२२ ॥
गन्धकाषायिकावस्त्र,-निर्जलीकृतविग्रहः । सन्तानवृद्धनारीभिः, कृतकौतुकमङ्गलः ॥ १२३ ॥
परिधाय महामूल्य,-वस्त्ररत्नानि सादरम् । समस्तावयवेषूच्चै,-रामुक्ताशेषभूषणः ॥ १२४ ॥
निजगेहाद्विनिर्गत्य, क्रीडितुं सोऽतिमुक्तकः । प्रधानस्वपरीवारो,-राजमार्गमवातरत् ॥ १२५ ॥ पञ्चभिः कुलकम् ॥
अनेकामात्यसामन्त,-बालकैः कलिलोलुपैः । स्वसमानवयोऽवस्थै,-र्धावमानैरितस्ततः ॥ १२६ ॥
चलच्चूलालतारम्यै,-र्गाढसंयमितांशुकैः । दृढसंहननैर्दक्षै,-रुल्ललद्भिर्मृगैरिव ॥ १२७ ॥
कन्दुकैर्जात्यगाङ्गेय,-निर्मितैरतिवर्त्तुलैः । सुरत्नखचितैर्दीप्तै,-र्लोचनप्रमदप्रदैः ॥ १२८ ॥
राजमार्गेऽतिविस्तीर्णे, स रेमे विजयाङ्गजः । जयन्त इव गीर्वाण,-कुमारैर्मुदितो दिवि ॥ १२९ ॥ चतुर्भिश्च कुलकम् ॥
सुचिरक्रीडयाऽऽक्रान्तः, स विश्राम्यंस्ततः क्षणम् । दिशोऽवलोकयन् याव,-त्तस्थौ स्वेदजलाविलः ॥ १३० ॥
उच्चनीचकुलेषूच्चैः, पर्यटन्तं महामुनिम् । ददर्श गौतमं ताव,-दतिमुक्तकुमारकः ॥ १३१ ॥
पप्रच्छ विस्मयोत्फुल्ल,-नेत्रस्तं सोऽतिमुक्तकः । के यूयं हेतुना केन, भ्रमथेत्थं गृहे गृहे ॥ १३२ ॥
देवानां प्रिय ! कल्याणि,-न्निर्ग्रन्थाः श्रमणा वयम् । भिक्षार्थं पर्यटामोऽत्राऽतिमुक्तं प्राह गौतमः ॥ १३३ ॥



For Private And Personal Use Only

भगवंस्तर्हि यद्येवं, युष्मभ्यं दापयाम्यहम् । भिक्षां गृहं समायाता,-ऽतिमुक्तो मुनिमब्रवीत् ॥ १३४ ॥
ततोऽङ्गुल्या समादाय, गौतमं गणभृद्वरम् । बालोऽसौ मञ्जुलालाप,-श्चचाल स्वगृहं प्रति ॥ १३५ ॥
गौतमेन सहायान्तं, संवीक्ष्य तनयं निजम् । तुतोषातिशयेन श्री,-र्माता स्वगृहसंस्थिता ॥ १३६ ॥
वन्दित्वा गौतमं हृष्टा, श्रीर्देवी प्रत्यलम्भयत् । प्रासुकेनैषणीयेन, प्रधानान्नेन सादरम् ॥ १३७ ॥
अतिमुक्तोऽपि पप्रच्छ, गौतमं गणभृद्वरम् । यूयं वसथ कुत्रेति, प्रसद्य ब्रूत मे प्रभो ! ॥ १३८ ॥
धर्म्माचार्याः पुरोद्याने, श्रीवीरस्वामिनो मम । विद्यन्ते जगतः पूज्या,-स्तत्र भद्र वसाम्यहम् ॥ १३९ ॥
भदन्तस्त(न्त त)र्हि यद्येवं, युष्माभिः सार्द्धमेव हि । वीरं वन्दितुमायामी,-त्यब्रवीदतिमुक्तकः ॥ १४० ॥
गत्वा ततः पुरोद्याने, वीरं नत्वाऽतिमुक्तकः । निषसाद महीपीठे, निबद्धाञ्जलिसम्पुटः ॥ १४१ ॥
ततः श्रीमान्महावीर,-स्तस्याग्रे जिनपुङ्गवः । मुनीनां धर्ममाचख्यौ, दशधाऽपि सविस्तरम् ॥ १४२ ॥ तथाहि ॥
क्षान्तिर्मार्दवमार्जवं च सततं मुक्तिस्तपःसंयमः, सत्यं शौचमकिञ्चनत्वमतुलं सद्ब्रह्मचर्यं तथा ।
कर्त्तव्यो यतिनामयं दशविधो धर्म्मोऽचिरान्मुक्तिदो,
दुष्प्रापं मनुजत्वमाप्य जगति स्वश्रेयसे प्राणिनाम् ॥ १४३ ॥
ध्रुवं नरकपातः स्या-त्पञ्चाश्रवनिषेविणाम् । एतेभ्यस्तु निवृत्तानां, मुक्तिसौख्यं करस्थितम् ॥ १४४ ॥
बालोऽप्यबालधीर्धर्म्मं, श्रुत्वा स्वगृहमागतः । अवोचदतिमुक्तोऽथ, पितरौ विनयान्वितः ॥ १४५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अम्ब ! तात ! मया धर्म्मः, श्रुतः श्रीवीरसन्निधौ । संसारवासतस्तेन, निर्विण्णः प्रव्रजाम्यहम् ॥ १४६ ॥
पितरावूचतुर्वत्स !, त्वं बालोऽद्यापि वर्त्तसे । धर्मं किमिह जानीषे, स्फटिकामलमानस ! ॥ १४७ ॥
मा(ता)तौ ! जाने यदेवाहं, न जानेऽहं तदेव हि । न जाने यत्तदेवाहं, जानेऽसावब्रवीदिति ॥ १४८ ॥
ततस्तौ तमवादिष्टां, वत्सैतद् घटते कथम् ? । जाने यत्तन्न जानेऽह,–मित्यादि वचनं तव ॥ १४९ ॥
उत्पन्नस्य ध्रुवं मृत्यु,–रिति जानामि देहिनः । कदा कियच्चिरात्कस्मिन्, कथं वेति न वेद्म्यहम् ॥ १५० ॥
तथा न जाने यज्जीवाः, शुभ्र(श्वभ्रं)कैर्यान्ति कर्म्मभिः । एतत्पुनरहं जाने, यान्ति स्वकृतकर्म्मभिः ॥ १५१ ॥
इत्यादिवचनैस्तेन, पितरौ प्रतिबोधितौ । ततस्ताभ्यामनुज्ञातः कृतनिष्क्रमणोत्सवः ॥ १५२ ॥
आरुह्य शिबिकां रम्यां, सहस्रनरवाहिनीम् । सपित्रादिपरीवारः, पुरस्योपवनं ययौ ॥ १५३ ॥
विजयेन नरेन्द्रेण, श्रिया देव्या च सादरम् । विज्ञप्तः श्रीमहावीरः, पुरस्कृत्यातिमुक्तकम् ॥ १५४ ॥
भगवन्नावयोरिष्ट,–स्तनयः शिशुरप्यसौ । विवेकी बुद्धिमानेष, निर्विण्णो भववासतः ॥ १५५ ॥
सचित्तां भगवन् ! भिक्षां, गृहाणास्माकमीदृशीम् । संवेगभाजनं चैनं, भवकूपात्समुद्धर ॥ १५६ ॥
दत्त्वा तस्मै व्रतं वीरः, सर्वज्ञः शैशवेऽपि हि । मधुरोदारशब्देन, जगौ तत्पराविदम् ॥ १५७ ॥
धन्योऽयं पुण्यवानेष, सुलब्धं चास्य जन्म भोः ! । येनालम्भि परिव्रज्या, सर्वदुःखविमोक्षणी ॥ १५८ ॥
ततश्च विजयो भूपः, श्रिया देव्या समन्वितः । विवेश नगरीं वीरं, प्रणम्य सपरिच्छदः ॥ १५९ ॥

For Private And Personal Use Only

विजहारार्हता सार्द्धं,-मतिमुक्तमुनिर्भुवम् । कुर्वताऽस्तं तमोराशि,-मादित्येन बुधो यथा ॥ १६० ॥

विहरति क्षितिमण्डलमर्हति, द्युतिजितभ्रमराञ्जनसन्ततिः ।
सलिलभृत्समयोऽवततार स, व्रतिगणा विहरन्ति न यत्र च ॥ १६१ ॥

निववृते पथिकैर्विदिशो दिशो, हृदि धृतप्रमदैः स(स्व)गृहं प्रति ।
प्रचलितैर्विदधे च गृहे स्थिति,-र्धवलपक्षखगैरिव मानसे ॥ १६२ ॥

विकमलोत्करमुत्थितकन्दलं, प्रचुरपङ्कपरिस्खलितप्रजम् ।
बहुजलावलि यत्र महीतलं, कदवनीपतिराज्यमिवाभवत् ॥ १६३ ॥

नभसि यत्र जलं प्रविमुञ्चती, विदधती दृढमूर्जितगर्जितम् ।
जलधरावलिरञ्जनसन्निभा, समदन्तिततेर्दधते श्रियम् ॥ १६४ ॥

वृष्टिं विधायोपरतेऽम्बुवाहे, जलप्रवाहेषु वहत्सु सत्सु ।
बहिर्भुवं स स्थविरैः समेतो, यथा मतङ्गैः करिराजपोतः ॥ १६५ ॥

रजोहरणमात्मीयं, पतद्ग्रहमपि स्वकम् । कक्षामध्ये विनिक्षिप्या,-तिमुक्तकमुनिर्ययौ ॥ १६६ ॥ युग्मम् ॥

गच्छंश्च मार्गे प्रविलोकय देशे, वहन्तमेकत्र जलप्रवाहम् ।
बाल्यानुभावेन स चञ्चलत्वा,-न्मृदं समादाय बबन्ध पालिम् ॥ १६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षिप्त्वा ततस्तत्र पतद्ग्रहं स्व,-मियं तरिर्मेऽस्मि च कर्ण्णधारः ।
इति ब्रुवंस्तं प्रणुदस्त यष्ट्या, स्वैरं समं क्रीडतु कौतुकेन ॥ १६८ ॥
दृष्ट्वा ततोऽसौ स्थविरैर्निषिद्धो, विनीतभावाच्च ततो निषिद्धः ।
एवंविधाः स्युर्भुवने कुलीना, विशेषतो राजसुताः प्रकृत्या ॥ १६९ ॥
पादमूले जिनेन्द्रस्य, समेत्य स्थविरास्ततः । निबद्धाञ्जलयो नम्र,-मूर्द्धान इदमूचिरे ॥ १७० ॥
योऽयं भगवतां शिष्यः, क्रीडत्येवं बहिर्भुवि । कृत्वा कर्मक्षयं मोक्षं, गन्ताऽसौ कतिभिर्भवैः ? ॥ १७१ ॥
अथ श्रीमान्महावीरः, सुधामधुरया गिरा । स्थविरान् प्रत्युवाचैवं, हे आर्याः ! स्वहितैषिणः ! ॥ १७२ ॥
विनीतविनयोऽस्माकं, विनेयो लघुरप्यसौ । प्रकृत्या भद्रकश्चैषो,-ऽतिमुक्तकमहामुनिः ॥ १७३ ॥
महात्माऽयं महाभागो, महासत्त्वशिरोमणिः । संसारसागरं तीर्त्वा, भवेऽस्मिन्नेव सेत्स्यति ॥ १७४ ॥
कर्तुं नैवोचिता निन्दा,-ऽवहेला गर्हणाऽपि वा । युष्माकं च निरीहाणा,-मस्य साधोरतः परम् ॥ १७५ ॥
संगृह्णीतादरेणामुं, मुनिं मुनिगुणोत्तरम् । विनयं कुरुतामुष्य, वैयावृत्त्यं च यत्नतः ॥ १७६ ॥
ततस्ते स्थविरास्तस्य, विदधुर्विनयादिकम् । साक्षात्तीर्थकृतां वाक्ये, कस्य न स्यादिहादरः ? ॥ १७७ ॥
वृद्धास्तं पाठयामासु,-रादराद्विनयान्वितम् । विनीतविनये शिष्ये, किं किं कुर्युर्न सूरयः ? ॥ १७८ ॥
बालोऽप्यथ तथा यत्ना,-दधीते स्म स धीरधीः । यथा बभूव स स्वल्प,-कालेनैकादशाङ्गवित् ॥ १७९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथानन्यसुखस्तिष्ठन्, पुरतो निश्चलासनः । प्राञ्जलिर्वदनद्वारे, दधानो मुखवस्त्रिकाम् ॥ १८० ॥
मुक्तो निद्राप्रमादेन, विकथाभिर्विवर्जितः । आनन्दं जनयन्नुच्चै,-र्गुरूणां गुणशालिनाम् ॥ १८१ ॥
स्थविरेभ्यः स्थिरप्रज्ञो, बहुमानपुरस्सरम् । शुश्रावासौ श्रुतस्यार्थ,-मतिमुक्तमुनिर्मुदा ॥१८२॥ त्रिभिर्विशेषकम् ॥
तथा तेऽप्याऽऽगमस्यार्थ,-मेतस्मै व्याचचक्षिरे । बुबुधे सोऽप्यनायासा,-दतिसूक्ष्मतरं यथा ॥ १८३ ॥
किं भूयसा स गीतार्थः, सर्व्वत्र कुशलोऽभवत् । साधुक्रियाकलापेषु, दिनैः कतिपयैरपि ॥ १८४ ॥
सुभद्रशालनन्दनः, समुन्नतिप्रकर्षवान् । स्थिरः सुवर्णरत्नभू,-सुपर्व्वतोर्व्वतो यथा ॥ १८५ ॥
समुद्रसंहते रत्नं, बृहत्तरसुवृत्तवान्, अलब्धमध्यतान्वितो, यथान्त्यनिम्नगापतिः ॥ १८६ ॥
सितांशुकः प्रमोदकः, समस्तलोकचक्षुषाम् । यथैव पूर्णिमाहिमद्युतिर्महोभिरन्वितः ॥ १८७ ॥
मदोद्धतानपि क्षितौ, परप्रवादिकुञ्जरान् । प्रणाशयन् विदूरतो, यथैव गन्धसिन्धुरः ॥ १८८ ॥
स्खलद्गतिर्न कुत्रचि,-न्महाबलाङ्गसंस्थितिः । सदामिषप्रयोषकृ,-द्यथा कुरङ्गशात्रवः ॥ १८९ ॥
तमस्ततिं विलुण्टयन्, विलूनजाड्यसन्ततिः । विराजितः सुतेजसा, क्षमारसं प्रपोषयन् ॥ १९० ॥
स्वपादसङ्गमेन सो,-ऽतिमुक्तकाभिधो मुनिः । पुपाव भूमिमण्डलं, प्रभाकरो यथाऽखिलम् ॥ १९१ ॥
सप्तभिः प्रमाणीच्छन्दोभिः कुलकम् ॥
क्रोधोद्दामज्वलज्ज्वाला,-नलं प्रशमयन्नयम् । लसत्प्रशमपीयूष,-वारिपूरेण सर्वतः ॥ १९२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्युत्पन्नमतिस्तब्ध,–मतिमानमहीधरम् । मार्दवाशनिपातेन, चूर्णयन् कणशोऽनिशम् ॥ १९३ ॥
अतिवक्रामतिक्रूरां, मायाव्यालावलीं हठात् । सदार्जवमहामन्त्रैः, स्तम्भयन्नेष सन्मनि ॥ १९४ ॥
व्याप्नुवन्तं विश्वविश्व,–मगाधं लोभसागरम् । सन्तोषसेतुबन्धेन, सर्वथैव नियन्त्रयन् ॥ १९५ ॥
सम्यक्समितिभिर्युक्तो, गुप्तित्रयपवित्रितः । ज्ञान–दर्शन–चारित्र–रत्नत्रयविभूषितः ॥ १९६ ॥
तप्यते स्म तपस्तीव्रं, गुर्वनुज्ञापुरस्सरम् । भेदैः षष्ठादिभिर्भिन्न,–मनगारोऽतिमुक्तकः ॥ १९७ ॥ षड्भिः कुलकम् ॥
मुनिर्विजयनन्दनः सगुणरत्नसंवत्सरं, तपोऽतिशयदुष्करं तदिह कर्तुमारब्धवान् ।
अनावृतशरीरकैर्निशि निबद्धवीरासनै,–र्यदुत्कु(त्क)टिकसंस्थितै रविमुखैर्दिवा तप्यते ॥ १९८ ॥
आद्यमासे चतुर्थेन, तपोऽदस्तप्यतेऽमुना । द्वितीये षष्ठषष्ठेन(षष्ठभक्तेन), तृतीये चाष्टमेन तु ॥ १९९ ॥
उत्कु(त्क)टिकासनस्थेन, दिवा सूर्यावलोकनाद् । रात्रौ वीरासनस्थेना,–ऽव्यावृतेन समाधिना ॥ २०० ॥
एकैकस्योपवासस्य, मासे मासे प्रवर्द्धनात् । यावत्षोडशभिर्मासै,–रुपवासैरपूर्यत ॥ २०१ ॥

निर्मांसरक्तस्तपसाऽमुनैवं, वाचंयमोऽसावतिमुक्तकाख्यः ।
जज्ञे नितान्तं धमनीनिबद्ध,–चर्मास्थिशेषोज्ज्वलदेहयष्टिः ॥ २०२ ॥
यावन्ममाङ्गे बलमस्ति किञ्चि–त्संलेखनां तावदहं करोमि ।
इति स्वचित्ते परिभाव्य सद्य,–स्तपः प्रपेदेऽनशनं महात्मा ॥ २०३ ॥

For Private And Personal Use Only

स पश्चिमं मासकमादधान,-स्तपो मुनिः केवलमाप्य मुक्तिम् ।
तां वीरशिष्यो विजयाङ्गजन्मा, लेभेऽतिमुक्तो मुनिमाननीयः ॥ २०४ ॥
यस्यां न मृत्युर्न जरा न जन्म, न रोग-शोकौ न वियोगशङ्का ।
न क्लेशलेशो न कलिर्न खेदो, न म्लानिभावो न पराभवश्च ॥ २०५ ॥
न दुर्जनानां वचनावकाशो, न द्वेषरागौ न कुटुम्बचिन्ता ।
न चान्तरायो न मृषा न हिंसा, न चारतिर्नैव शरीरपीडा ॥ २०६ ॥
न क्रोध-मानौ न च लोभ-माये, न तृड्-बुभुक्षे न मदो न निद्रा ।
न दैन्य-याञ्चे न हसो न निन्दा, नाज्ञान-मिथ्यात्व-मनोभवाश्च ॥ २०७ ॥
न संशयो वस्तुनि नो जडत्वं, न दौर्मनस्यं न दरिद्रता च ।
न राज-चौरादिभयं न तापो, नावर्णवादो न पुनर्निवृत्तिः ॥ २०८ ॥
किन्तु-शुद्धं सम्यक्त्वरत्नं स्फुरदतिविशदं दर्शनज्ञानमग्र्यं,
सर्वाकाशप्रदेशप्रचुरतरमहो यत्र सौख्यं समस्ति ।
वीर्यं वीर्यांतरायक्षयजनितमिदं विद्यते वाऽप्यनन्तम्,
जीवस्याशेषकर्मप्रचयपरिचितिप्रोज्झितस्यामलस्य ॥ २०९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानाङ्गपञ्चमसदङ्गमृषिस्तवेभ्यो, दृष्ट्वा जडप्रकृतिनापि मया विदृब्धम् ।
चित्रं चरित्रमिह देवगुरुप्रसादा,-च्चञ्चन्मतेर्वरमुनेरतिमुक्तकस्य ॥ २१० ॥
श्रीमत्प्रल्हादनपुरवरे पूर्णभद्रो गणिर्द्राक्, शिष्यः श्रीमज्जिनपतिगुरोश्चारु चक्रे चरित्रम् ।
चित्राश्चर्यं विजयतनयस्यातिमुक्तस्य साधो,-र्द्व्यष्टार्काब्दे(१२८२) दितिसुतगुरौ कार्त्तिके पूर्णमास्याम् ॥ २११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ समाप्तं चेदमतिमुक्तकमुनिचारितम् ॥

॥ १० ॥

For Private And Personal Use Only